# किरातार्जुनीयमहाकाव्ये काव्यसौन्दर्यम्

महानन्दतिमिल्सिना, विद्यावारिधिः
सहप्राध्यापकः : साहित्यम्
नेपालसंस्कृतविश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः, नेपालः
timsinamahananda@gmail.com

Article History : Received - 19 April. 2026, Reviewed - 10 May 2026, Accepted - 17 June 2026
DOI : https://doi.org/10.3126/ss.v4i05.96262

**लेखसारः**

किरातार्जुनीयमहाकाव्ये काव्यसौन्दर्यस्य प्राचुर्यं संलक्ष्यते । अत्र रसगुणालङ्कारादीनां सौन्दर्यं स्पष्टतया परिलक्ष्यते । संस्कृतवाङ्मये किरातार्जुनीयमहाकाव्यस्य विशिष्टा भूमिका वर्तते । अस्य महाकाव्यस्य रचयिता महाकविर्भारविः । अत्राऽष्टादशसर्गा विद्यन्ते । कालिदासोत्तरकाले षष्ठशतके काव्यमिदं रचितमिति ज्ञायते । अस्य महाकाव्यस्य विषयवस्तु व्यासरचितस्य महाभारतस्य वनपर्वतः शिवपुराणतश्च गृहीतम् । महाकाव्यस्यास्य नायकोऽर्जुनः, नायिका च द्रौपदी । अत्र वीररसः प्राधान्येनाभिव्यज्यते । महाकाव्ये बाहुल्येन वंशस्थवृत्तस्य प्रयोगो दृश्यते । संस्कृतमहाकाव्यपरम्परायां भारविप्रणीतं किरातार्जुनीयमहाकाव्यमद्वितीयं स्थानं विभर्ति । अस्य काव्यस्य प्रधानं वैशिष्ट्यं गाम्भीर्यपूर्णा भाषा, उत्कृष्टाऽलङ्कारयोजनाऽर्थगौरवञ्चेति विद्वद्भिः स्वीकृतम् । 'भारवेरर्थगौरवम्' इति प्रसिद्धोक्त्या तस्य काव्यप्रतिभा सुस्पष्टा भवति । किरातार्जुनीयमहाकाव्यं गुणत्रयसमन्वितत्वाद् भाषासौष्ठवाद् भावगाम्भीर्याद् रसान्वितत्वादलङ्कारालङ्कृतत्वात् कल्पनाप्रचुरत्वाद् रचनानैपुण्याद् विद्वज्जनकण्ठहारत्वमगात् । कृतिरियमर्थगौरवसम्पन्ना । महाकाव्यमिदं भाषागौरवेणालङ्कारवैचित्र्येण रससमन्वयेन च संस्कृतसाहित्ये सर्वोच्चकोटिं प्राप्नोति । अस्य काव्यस्य भाषाऽत्यन्तं गाम्भीर्ययुक्ता वर्तते । महाकाव्यमेतद् दीर्घसमासयुक्तया पदरचनया सूक्ष्मार्थप्रदर्शनया च पाठकानां मनांसि समाकर्षयति । अस्मिन् महाकाव्ये प्रयुक्तैरुपमोत्प्रेक्षा-रूपक-श्लेषादिभिरलङ्कारैः काव्यसौन्दर्यं समेधितमस्ति । विशेषतोऽनुप्रासस्य श्लेषस्य च सुन्दरप्रयोगे काव्यमिदं सफलं प्रतिभाति । काव्ये सर्वत्र वीररसस्य उत्कर्षः संलक्ष्यते । लेखेऽस्मिन् महाकविभारविप्रणीते किरातार्जुनीयमहाकाव्ये काव्यशास्त्रीयं सौन्दर्यं कीदृशमस्तीति विषये विवेचितमस्ति । अत्र महाकवेर्भारवेः परिचयप्रदानपूर्वकं किरातार्जुनीयमहाकाव्यस्य वैशिष्ट्यं च प्रकाशितं विद्यते । संस्कृतमहाकाव्यपरम्परायां किरातार्जुनीयमहाकाव्यस्य काव्यसौन्दर्यं कीदृशमस्तीति विषये लेखेऽस्मिन् पर्यवेक्षणं विहितमस्ति । अनेनाध्ययनेन किरातार्जुनीयमहाकाव्ये काव्यसौन्दर्यसमेधकैस्तत्त्वैश्चमत्कारातिशयं वर्धितमस्तीति निष्कर्षो निस्सार्यते । गुणात्मिकायामनुसन्धानपद्धत्यामाधारितेऽस्मिन्ननुसन्धाने एपीएसप्तमसंस्करणानुसारेण द्वितीयकस्रोतोयुतानां सामग्रीणां संयोजनं कृतं वर्तते ।

**बीजशब्दाः** अर्थगौरवम्, अलङ्कारः, अलङ्कारः, महाकाव्यसिद्धान्तः, वीररसः ।

**विषयपरिचयः**

संस्कृतमहाकाव्यपरम्परायां भारवेर्महत्त्वपूर्णं स्थानं वर्तते । अस्य रचनाशैली अतिमनोहराऽर्थगौरवपूर्णा च विद्यते । असौ संस्कृतकाव्यजगत्यलङ्कृतशैल्याः प्रवर्तकः । अस्य किरातार्जुनीयं महाकाव्यं प्रसिद्धम् । संस्कृतमहाकाव्येष्वेतद् बृहत्त्रय्यन्तर्गतं विद्यते । कवेरस्य जन्मसमयविषये जन्मस्थानविषये च विभिन्नानि मतमतान्तराणि दृश्यन्ते । वि.सं. ६९० तमस्य एहोलशिलालेखेऽस्य नाम उट्टङ्कितं प्राप्यते । एतत्प्रभृतिभिः प्रमाणैरस्य समयः षष्ठशतकस्योत्तरार्ध इति ज्ञायते । कविरसौ कालिदासपरवर्ती माघपूर्ववर्ती च वर्तते । केचनोऽन्वेषका कविममुं दक्षिणभारतीयं मन्यन्ते, कतिपये उत्तरखण्डभवमिति । कौशिकगोत्रोत्पन्नः कविरयं नारायणस्वामिनः पुत्रः, दण्डिनः प्रपितामहश्चासीत् । अस्य जन्मनाम दामोदर इति ज्ञायते । बृहत्त्रय्यां किरातार्जुनीयस्यैव नाम प्रथमं गृह्यते, अनन्तरमेव शिशुपालवध- नैषधीयचरितमहाकाव्ययोः । सम्प्रति भारवेः कृतित्वेन किरातार्जुनीयमेव लभ्यते । प्रतिभासम्पन्नस्यास्य तदितरा अपि कृतयः स्युरित्यनुमीयते । महाकविरसौ भाषा-भाव-सौन्दर्य-रससिद्धि-वर्णनचातुरी-शास्त्रीयपाण्डित्यादिविविधपक्षाणामेकाश्रय इति कथ्यते । अस्य कवित्वविषये नैका उक्तयः सन्ति, यथा-

'उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥'
'तावद्भा भारवेर्भाति यावन्माघस्य नोदयः ।'
'नारिकेलफलसन्निभं वचो भारवेः' इति ।

अस्य काव्ये भावानुसारं शब्दप्रयोगः, अर्थगौरवम् उदात्तकल्पना च प्राप्यते । अस्य भाषायां माधुर्यप्रौढतयोरपूर्वसमन्वयो दृश्यते । काव्ये भावापेक्षया कलापक्षस्य प्राधान्यं विद्यते । सूक्तिप्रियस्य कवेः काव्यस्याधिकांशभागः सूक्तिमयो वर्तते । असौ प्रकृतिचित्रणे कुशलः, उपमोत्प्रेक्षार्थान्तरन्यासादीनामलङ्काराणां प्रयोगेऽसौ निपुणः, विविधछन्दप्रयोगे रससंयोजने च विज्ञो दृश्यते ।

अस्य महाकाव्यस्य कथावस्तु महाभारताश्रितमस्ति । विशेषतो वनपर्वे वर्णितमर्जुनस्य तपः, किरातवेषेण भगवता शिवेन सह तस्य युद्धञ्चात्र विस्तरेण निरूपितम् । अत्र कविना न केवलं कथा वर्णिता, अपि तु नायकस्य धैर्यम्, पराक्रमः, तपश्चर्या च सौन्दर्यपूर्वकं प्रकाशिता । प्रकृतिवर्णनमप्यस्य काव्यस्य महत्त्वपूर्णं पक्षम् । वनस्य सौन्दर्यम्, पर्वतानां रमणीयता, ऋतुवर्णनञ्च कविनाऽत्यन्तं सजीवया शैल्या निरूपितम् । कविनाऽस्मिन् काव्ये चित्रात्मकतायाश्चात्यन्तं प्रभावान्वितः प्रयोगो विहितः । कविः स्वल्पैः शब्दैर्बहून् गूढार्थान् प्रकाशयति । श्लोकानां व्याख्यानकाले विद्वांसोऽपि बहुचिन्तनं कुर्वन्ति । अयं गाम्भीर्यभावः काव्यस्य बौद्धिकसौन्दर्यं वर्धयति । भारविर्दीर्घसमासप्रयोगेण प्रसिद्धः । अत्रमहाकाव्यमिदं कथावस्तुसंयोजनदृष्ट्या महाभारते समाश्रितमपि वस्तुवर्णने संलक्षितया मौलिकया शैल्या स्वतन्त्रकाव्यरूपेण प्रतिष्ठितम् । अर्जुनस्य तपश्चर्या, तस्य मनोवृत्तिः, देवतासंवादः, किरातवेशेण शिवेन सह युद्धप्रसङ्गश्च कविना सुसम्बद्धतया कृतो विलोक्यते । अस्य कथानकनिर्माणकौशलं प्रशंसनीयम् । अत्रार्जुनो धैर्यशील-तपस्वि-विनयीनायकरूपेण चित्रितः । एवञ्च शिवोऽपि परीक्षकत्वेन करुणास्वरूपेण च प्रकटितो विद्यते । एतयोः संवादाः काव्ये दार्शनिकं गाम्भीर्यं योजयन्ति ।

प्रस्तुतेऽनुसन्धाने किरातार्जुनीयमहाकाव्यस्य काव्यसौन्दर्यदृष्ट्याऽध्ययनं कृतमस्ति । किरातार्जुनीयमहाकाव्ये काव्यसौन्दर्यस्यानुसन्धानविधानं प्राज्ञिकी समस्या वर्तते । लेखस्योद्देश्यमस्य महाकाव्यस्य काव्यसौन्दर्यप्रकाशनं विद्यते ।

अध्ययनेऽस्मिन् किरातार्जुनीयमहाकाव्ये प्रयुक्तानां काव्यसौन्दर्यसम्बद्धानां छन्दोऽलङ्कार-रसादीनां प्रमुखविषयाणामेव समीक्षणं विहितमस्ति । महाकाव्ये प्रस्तुतस्य कथावस्तुनः स्रोतः, प्रकृतिचित्रणम्, धर्मनीतिः, राजनीतिः, अर्थव्यवस्था चेत्यादिषु विषयेषु लेखेऽस्मिन् चर्चा नैव कृता । एतेषां विषयाणामध्ययनं विधातुमसमर्थताप्रकाशनमेवास्य लेखस्य सीमा विद्यते । महाकविभारवेः किरातार्जुनीयमहाकाव्यमवलम्ब्य नैकविधमध्ययनमनुसन्धानं विहितं संलक्ष्यते ।

विविधैराचार्यैर्महाकविभारविविषये तस्य किरातार्जुनीयमहाकाव्यविषये च चर्चा विहिता दृश्यते । रामचन्द्रमिश्रः (ई.२०१०) *संस्कृतसाहित्येतिहास*पुस्तके भारवेः काव्यशैलीविषये कथयति यत् - 'भारवेरर्थगौरवम्' प्रसिद्धम् । अतएव मल्लिनाथोऽपि टीकाप्रारम्भे - 'नारिकेलफलसन्निभं वचो भारवे'रित्याह । बहोरप्यर्थराशेरल्पेन शब्देनाभिधाने भारविरभ्यस्तकौशल इति सर्वेषां विदुषां विचारः । भीमभाषणस्य प्रशंसायां युधिष्ठिरेण प्रोक्तम् -

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहतं क्वचित् ॥ (२/२७)

वस्तुत इयमेवोक्तिर्भारविकवित्वप्रशंसायामप्युपयुज्यते । इति । (पृ.२५)

एवमेव आचार्यबलदेवोपाध्यायः (ई.१९९२) *संस्कृत साहित्य का इतिहास*नामके पुस्तके भारवेः कवित्वविषये प्रस्तौति - भारवेर्भाषा हृदयाह्लादिका वर्तते । 'प्रसन्नगभीरपदा सरस्वती' इति भारवेर्भाषाशैल्या द्योतकं मन्त्रम् । अस्य कवितायां वर्णनात्मकस्य तर्कात्मकस्य चोजसः प्राधान्यमस्ति । अनेन काव्ये व्यावहारिकस्य तत्त्वज्ञानस्य विषये स्वानुभवजन्यस्तार्किको विचारः प्रस्तुतः । श्लेषानुप्राणितोपमायाः प्रयोगेणार्थगौरवप्रकाशनेऽसौ सिद्धहस्तः (पृ.१८८) ।

कपिलदेवद्विवेदी (ई.२०१५) प्रौढ*रचनानुवादकौमुदी*पुस्तके भारवेरर्थगौरवमिति शीर्षके कवेर्वैशिष्ट्यं प्रकाशयति, यत् - प्रशस्तैः स्वीयैर्गुणैर्महाकावेयमेतत् संस्कृतसाहित्ये प्रमुखं स्थानमाश्रयते । संस्कृतमहाकाव्येषु बृहत्त्रय्यामन्यतमं गण्यते । समग्रेऽपि संस्कृतसाहित्ये नैतादृशमोजोगुणसमन्वितं काव्यान्तरम् । अष्टादशात्र सर्गाः (पृ.३१५) ।

रामप्रतापत्रिपाठी शास्त्री (ई.१९७१) महाकविभारविविरचितस्य *किरातार्जुनीयमहाकाव्यस्य* भूमिकायामस्य ग्रन्थस्य वैशिट्यविषये समीक्षां विदधाति, यत् - मानवजीवनस्योच्चकोटेर्नैतिकता सदाचारमर्यादा च किरातार्जुनीयमहाकाव्यस्य प्रतिपाद्यो विषयः । लोकनीतिरप्यस्य परमप्रिया । नैतिकतायाश्चरमा सीमा समुज्ज्वलादर्शश्च किरातार्जुनीयस्य वैशिष्ट्यमिति (पृ.१२) ।

अनेन प्रकारेण बहुभिर्विद्वद्भिः किरातार्जुनीयमहाकाव्यविषये स्वकीया विचाराः प्रस्तुताः, परमस्य काव्यसौन्दर्यविषये विस्तरेण विवेचनं नैव संलक्ष्यते । अतोऽस्यैव शोधान्तरालस्य पूरणार्थं शीर्षकमिदमौचित्यपूर्णं वर्तते ।

## अध्ययनविधिः

किरातार्जुनीयमहाकाव्यस्य काव्यसौन्दर्यानुशीलनमिति शीर्षके केन्द्रितमध्ययनमेतत् गुणात्मिकायामनुसन्धानपद्धत्यामाधारितमस्ति । अत्र पुस्तकालयीयानां सामग्रीणां प्रयोगो विद्यते । आलेखेऽस्मिन् 'एपीए-सप्तमसंस्करणम्' पद्धतिना विषयविश्लेषणं विहितं विद्यते । पौरस्त्यकाव्यशास्त्रिभिर्विरचितानि महाकाव्यसिद्धान्तसम्बद्धानि पुस्तकान्यप्यत्र सामग्रीरूपेण संयोजितानि विद्यन्ते । किरातार्जुनीयमहाकाव्यसम्बद्धे महाकविभारविविषये च प्रकाशितानि पुस्तकानि, विचाराः, लेखाश्चात्र सङ्कलनं विधाय विश्लेषणं कृतं वर्तते । सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेरुपयोगो विहितः ।

### सैद्धान्तिकपर्याधारः

विश्वनाथेन साहित्यदर्पणग्रन्थे सम्यग्रूपेण काव्यलक्षणादीनां निरूपणं विहितम् । अनेन पूर्वाचार्योक्तानि महाकाव्यलक्षणानि रघुवंशकिरातार्जुनीयशिशुपालवधसदृशानि चतुर्दशशताब्दीं यावत् प्रकाशितानि महाकाव्यानि च सम्यक् समीक्ष्य विश्लेषणात्मकं महाकाव्यलक्षणं प्रस्तुतम् । विश्वनाथस्यानुसारं महाकाव्यं सर्गबद्धं भवति । तत्र धीरोदात्तगुणान्वितः सुरः सद्वंशः क्षत्रियः, एकवंशभवा नृपा वा नायकत्वेन समागच्छन्ति । शृङ्गारवीरशान्तानामेको रसोऽङ्गी, अन्ये च रसा अङ्गानि भवन्ति । नाटके इवात्रापि पञ्चसन्धीनां प्रयोगो भवति । अस्य कथावस्तु इतिहासप्रसिद्धमथवा सज्जनाश्रितं भवितुं शक्नोति । धर्मादीनां चतूर्णां वर्गाणां वर्णने सत्यप्येकस्य फलप्राप्तिर्वर्ण्यते । महाकाव्यारम्भे आशीर्नमस्क्रियावस्तुनिर्देशात्मकं वा मङ्गलाचरणमावश्यकम् । महाकाव्ये क्वचित्खलादीनां निन्दा क्वचित्सज्जनानां गुणकीर्तनं विधीयते । तत्र नानावृत्तमया अष्टाधिकाः सर्गाः संयोज्याः । सर्गा एकवृत्तमया भवन्ति परन्तु क्वचित् नानावृत्तमया अपि भवितुं शक्नुवन्ति । सर्गान्ते वृत्तपरिवर्तनं क्रियते, भाविसर्गस्य कथायाः सूचना च दीयते । महाकाव्ये सन्ध्यासूर्येन्दुरजनीप्रदोषादीनां यथौचित्यं वर्णनं क्रियते । कवेर्वृत्तस्य नायकस्येतरस्य वा नाम्ना महाकाव्यस्य नामकरणं विधीयते । सर्गोपादेयकथया च सर्गनाम निश्चीयते (साहित्यदर्पणम्, ६/३१५-३२५)।

पौरस्त्यमहाकाव्यसिद्धान्ते भामहादनन्तरं विश्वनाथस्य महत्त्वपूर्णं योगदानं दृश्यते । भामहेन महाकाव्यसिद्धान्तस्य प्रारम्भिकं स्वरूपं प्रस्तुतम् । भामहस्य महाकाव्यसिद्धान्तमवलम्ब्य पश्चाद्वर्तिभिराचार्यैस्तस्यैव सारः किञ्चित्परिष्कृत्य स्वशैल्या विश्लेषितः । भामहसम्मते महाकाव्यलक्षणे सर्गसङ्ख्या, वर्णनीयविषयाणां सूची, नायकस्य पात्राणाञ्च कृते गुणावगुणनिर्धारणम्, छन्दः, मङ्गलाचरणञ्च स्पष्टं न निर्दिष्टम् । दण्डिना एतान् विषयान् संयोज्य सुस्पष्टं महाकाव्यलक्षणं निर्धारितम् । रुद्रटेन महाकाव्ये प्रयोगात्मका विषया विश्लेषणात्मकरूपेण स्थापिताः । अनेन महाकाव्ये नायकमेव प्रमुखं स्वीकृत्य तस्य विजयार्थमावश्यकानि वर्ण्यतत्त्वानि प्रस्तुतानि । अग्निपुराणे महाकाव्यगतस्य रसस्य प्रधानता स्वीकृता । तत्र विस्तरेण प्रतिपादितेऽपि महाकाव्यलक्षणे नावीन्यं न दृश्यते । हेमचन्द्रस्य महाकाव्यस्वरूपप्रतिपादनेऽपि प्रस्तुतिगता नवीनतैव प्राप्यते । विश्वनाथस्य महाकाव्यलक्षणं विस्तृतं स्पष्टं व्याख्यात्मकञ्च दृश्यते । पूर्ववर्तिनामाचार्याणां विचारञ्च समावेश्यानेन स्वकीया नवीना मान्यता प्रस्तुता । ध्वनिगुणदोषालङ्कारादीनां स्वरूपप्रतिपादनेऽपि संस्कृतकाव्यशास्त्रेऽसौ प्रसिद्धः । मूलतः काव्यशास्त्रिणः स्वकीये समये उपलब्धमहाकाव्यानामाधारेण महाकाव्यस्य लक्षणानि प्रस्तुतवन्तः । प्रायश आधुनिका समालोचका विश्वनाथस्य विचारान् प्रामाणिकत्वेनाङ्गीकुर्वन्ति । महाकाव्यमिदं विश्वनाथस्य महाकाव्यलक्षणं पूर्णतयाऽङ्गीकृत्य संरचितं विलोक्यते ।

### किरातार्जुनीयमहाकाव्यस्य कथावस्तु

महाकविभारवेः किरातार्जुनीयमहाकाव्येऽष्टादशसर्गाः सन्ति । एतत् संस्कृतमहाकाव्यलक्षणानुसारेण लिखितं वर्तते । अस्य कथावस्तु महाभारतस्य वनपर्वतो गृहीतमस्ति । तत्र वर्णितस्यार्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तमादाय निबद्धमिदं महाकाव्यं भावपक्षापेक्षया कलापक्षमेव समधिकं पुष्णाति । अस्य महाकाव्यशीर्षकस्य व्युत्पत्ति एतादृशी वर्तते - किरातश्च अर्जुनश्च किरातार्जुनौ, तौ अधिकृत्य कृतं काव्यं किरातार्जुनीयमहाकाव्यमिति । अत्र काव्ये दिव्यास्त्रलाभाय इन्द्रकीलपर्वते तपस्यां कुर्वतोऽर्जुनस्य, किराताधिपतेर्भगवतः शङ्करस्य च परस्परयुद्धं वर्णितमस्ति ।

अत्र नायकोऽर्जुनो धीरोदात्तगुणान्वितो वर्तते। एतद् वीररसप्रधानं महाकाव्यमस्ति। अस्याङ्गत्वेन श्रृङ्गाररौद्रशान्तादयो विविधा रसाः समाविष्टाः सन्ति । अस्य महाकाव्यस्य प्रतिसर्गान्ते 'लक्ष्मी'शब्दस्य प्रयोगो विद्यते । अत्र सर्गान्ते छन्दपरिवर्तनम्, भाविसर्गस्य कथायाः सूचनं, सर्गेष्वनेकानां छन्दसां सन्निवेशो दृश्यते । कविना हृदयग्राहि प्रकृतिचित्रणञ्च विहितमस्ति। महाकाव्यस्यास्य सङ्क्षिप्तकथावस्तु एतादृशं वर्तते -

द्यूते पराजितो युधिष्ठिरः सानुजः सपत्नी वनवासाय द्वैतवनं प्रविशति। तत्रावस्थितः स दुर्योधनवृत्तान्तज्ञानाय कञ्चित्किरातं ब्रह्मचारिरूपेण हस्तिनापुरं प्रेषयति। ज्ञातवृत्त स द्वैतवनमागत्य सर्वं राज्ञे निवेदयति। राजाऽपि तत्सर्वं भ्रातृभ्यो द्रौपद्यै च श्रावयति । विपक्षस्योत्कर्षमसहमाना द्रौपदी पतिं धिक्कृतवती सती युद्धाय प्रेरयति। भीमोऽपि धैर्यमपहाय तं विक्रमाय प्रेरयति। युधिष्ठिरो भीमं सान्त्वयन्नेव व्यासस्य निर्देशानुसारमर्जुनाय दिव्यास्त्रलाभार्थं प्रेषयितुं तत्परो जातः। ततोऽर्जुनो यक्षेण सह तपसे हिमालयं प्रविशति। इन्द्रकीलपर्वतं गत्वा तपसि रतोऽर्जुनोऽप्सरादीनां विघ्नैः प्रताडितोऽपि स्वलक्ष्याद् न विचलितः। ततस्तं परीक्षितुं किरातवेशेण शिवस्तत्रागच्छति। उभौ समकालमेव शूकररूपेण आगच्छन्तं मूकदानवं प्रहरतः। तस्य निधनकारणमादाय तयोर्विवादः समुत्तिष्ठते। युद्धे पराजितोऽप्यर्जुनः स्वप्रयासं न त्यजति। तेनातीव प्रीतः शङ्करस्तस्मै पाशुपतास्त्रं ददातीति अष्टादशसर्गपर्यन्तस्य महाकाव्यस्य सङ्क्षिप्तकथावस्तु।

महाकाव्यसौन्दर्येषु छन्दोऽलङ्कारगुणरसादयः समाविष्टा भवन्ति । एवमेव काव्यसौन्दर्ये तत्र विद्यमानान्यर्थगौरव-प्रकृति-सूक्ति-द्वन्द्वप्रभृतीनि तत्त्वान्यपि स्वीक्रियन्ते । महाकाव्येऽस्मिन् संलक्षितानामेतेषां काव्यसौन्दर्याणां विवेचनमत्र विधीयते।

## विषयविश्लेषणम्

### किरातार्जुनीयेऽर्थगौरवसौन्दर्यम्

महाकविभारवेः किरातार्जुनीयमहाकाव्येऽर्थगौरववैशिष्ट्यं स्पष्टमनुभूयते। उपमालङ्कारप्रयोगेण कालिदासः, पदलालित्येन दण्डी, अर्थगौरवेण भारविश्च काव्यजगति प्रसिद्धो जातः। उक्तञ्च -

'उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥'

स्वल्पशब्देषु विपुलार्थसंयोजनमेवार्थगौरवम् । भारविः सुदीर्घमपि पन्थानं स्वल्पेनैव प्रयासेन पारयति । भारविना स्वकीये वैशिष्ट्येऽर्थगौरवमनेन श्लोकमाध्यमेन स्वीकृतम् -

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न सामर्थ्यमपोहितं क्वचित्। (२/२७)

अनेकेषु स्थानेष्वर्थान्तरन्यासालङ्कारप्रयोगेण सामान्यकथनैः प्रयोजनयुतानां शब्दानां सन्निवेशेन, स्वल्पशब्देनैव विततजीवनसन्दर्भस्य चित्रणेन च महाकाव्ये कविनाऽर्थगौरवता प्रयुक्ता।

यथा-

क. असाधुयोगा हि जयान्तरायाः (१/१४)

अत्र कविना दुर्जनसम्पर्कः कदापि न कर्तव्य इति विपुलं जीवनहितकारकं ज्ञानं स्वल्पेनैव शब्देन प्रस्तुतम्।

ख. प्रकर्षतन्त्रा हि रणे जयश्रीः। (१/१७)

युद्धे विजयश्री उत्कर्षस्याधीना भवति, अतो विजयाय शौर्यास्त्रबलानामावश्यकता भवतीति राजनीतिसम्बद्धः सार्वकालिको विषयः कविनाल्पवाक्येनैवोक्तः।

एतादृशस्यार्थगौरवस्य विषयो महाकाव्यस्य श्लोके श्लोके दृश्यते।

**प्राकृतिकं सौन्दर्यम्**

कविर्भारविः प्रकृतिचित्रणे कुशलो वर्तते। अस्य काव्ये नगर-ग्रामारण्यादीनां क्षेत्राणां वर्णनं दृश्यते। तेषां वर्णनप्रसङ्गे उद्दीपनालम्बनरूपेण प्रकृतिवर्णनं विहितम्। किरातार्जुनीयमहाकाव्ये सजीवं स्वाभाविकं च प्रकृतिचित्रणं वर्तते। शरदृतोर्वर्णनक्रमे कविना प्रकृतेर्मनोहरमाह्लादजनकं चित्रणं कृतम्। स्वच्छगगनस्य, निर्मलजलपूर्णानां तडागानाम्, पङ्करहितानां मार्गाणाञ्च यथार्थं चित्रणं काव्ये वर्तते। कविः परिपक्वशालिधान्यैः सुशोभितस्य भूमेर्वर्णनं करोति, यथा -

विनम्रशालिप्रसवौघशालिनीरपेतपङ्काः ससरोरुहाऽम्भसः।
ननन्द पश्यन्नुपसीम स स्थलीरुपायनीभूतशरद्गुणश्रियः॥ (४/२)

तथैव कविः तडागे नद्यां च स्थितानां चञ्चलानां मत्स्यानां जलकमलस्थलकमलानां विविधपुष्पाणाम्, शरत्कालीननदीतटानाञ्च स्वाभाविकं वर्णनं करोति। यक्षमुखेन शारदीशोभायाश्चित्रणं, यथा -

उपैति सस्यं परिणामरम्यतां नदीरनौद्धत्यमपङ्कतां मही।
नवैर्गुणैः सम्प्रति संस्तवस्थिरं तिरोहितं प्रेम घनाऽऽगमश्रियः॥ (४/२२)

अत्र कविरुपमोत्प्रेक्षा-स्वाभावोक्त्यर्थान्तरन्यासादीनामलङ्काराणां माध्यमेन प्राकृतिकरमणीयतायाश्चित्रणं विदधाति।

**द्वन्द्वजन्यं सौन्दर्यम्**

अत्र काव्ये कविना कौरवपाण्डवानां राजनैतिक-द्वन्द्वानां कौतुहलपूर्णं सफलं चित्रणं विहितम्। दुर्योधनादिभिः कौरवैर्द्यूते पराजिताः पाण्डवाः किं कर्तव्यविमूढाः सन्ति। अन्यायविरुद्धं योद्धुं तेषु वीर्यास्त्रबलं न विद्यते। ते सामर्थ्यरहितेन विमनसो दृश्यन्ते। भीष्म-कर्ण-द्रोणाचार्यादिवीरवरैः सह योद्धुं पाण्डवा असमर्था दृश्यन्ते। पाण्डवानां पराजयजन्यमनोद्वन्द्वस्य चित्रणं काव्ये प्रतिपादितम्। एतेषां सहयोगिरूपेण वेदव्यासः समागत्य राजनीतिसम्बद्धं ज्ञानमुपदिशति, यत् -

लभ्या धारित्री तव विक्रमेण ज्यायाँश्च वीर्यास्त्रबलैर्विपक्षः।
अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः॥ (१/१७)

राज्यसत्ताप्राप्त्यर्थं तात्कालिके समये यादृशी षड्यन्त्रस्य अवस्था आसीत्, तस्याः स्वाभाविकं चित्रणं काव्ये संलक्ष्यते। राज्यसत्तासञ्चालनक्रमे राजनीतौ पारिवारिकजनैः स्वकीयबन्धुभिश्च सह यद् वैमनस्यं प्रत्याघातं भवति स्म तदधुनापि दृश्यते। पक्षविपक्षयोर्वितर्क-भर्त्सन-दण्ड-भेदादीनां प्रयोगस्तस्मिन् समयेऽतीव प्रचलित आसीदिति ज्ञायते। अर्जुनस्य पत्नी-बन्धुजनवियोगः, इन्द्रकीलपर्वते विहितस्य कठोरतमस्तपः, किरातवेशेण शिवेन सह कृतं युद्धमित्यादयः सर्वे विषया राजनीतिसम्बद्धा विद्यन्ते। सर्वेषां पाण्डवानां हृदये विजयस्याकाङ्क्षा वर्तते, विजयाविजययोर्मनसि आन्तरिकं द्वन्द्वं वर्तते। द्रौपद्या हृदयं शत्रुकृतपराभवेन विदीर्णं वर्तते, अतः शत्रून् विजेतुं व्यासनिर्देशनानुसारेण तपः पद्धतिसञ्चालनार्थं सा अर्जुनाय प्रेरयति। पाण्डवपक्षे राज्यविजयसम्बद्धं द्वन्द्वं दृश्यते, कौरवपक्षे च विजितस्य राज्यस्य संरक्षणविषयसम्बद्धं द्वन्द्वं विद्यते। अत एतत् काव्यं राजनैतिकेन द्वन्द्वेन समन्वितमस्ति। एतादृशेन द्वन्द्वप्रयोगेन महाकाव्यमिदं पाठकानां कृते हृदयाह्लादकं संलक्ष्यते, अनेन काव्यस्य सौन्दर्यं समेधितमस्ति।

**सूक्तिसौन्दर्यम्**

कविना महाकाव्यस्य विविधस्थानेषु सूक्तीनां प्रयोगो विहितः। सूक्तिप्रियः कविरसौ सूक्तिमुक्तानां मालामेव ग्रथ्नाति। अस्य काव्यस्याधिको भागः सूक्तिमयो विद्यते। एताः सूक्तयो व्यवहारोपयोगिन्य उपदेशपरकाश्च सन्ति, यथा -

क) असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि। (१/१४)

दुष्टजनानां सम्पर्का विजयमार्गे विघ्नरूपा भवन्ति, उन्मूलनस्वभावानां विपत्तीनां स्थानानि च भवन्ति। कर्णप्रभृतीन् दुर्मन्त्रिणो नियुक्तिर्धृतराष्ट्रस्यैव विघ्नाय भवतीति व्यासः कथयति।

ख) भवन्ति भव्येषु हि पक्षपाताः। (१/१२)

युधिष्ठिरस्य गुणैराकृष्टस्य व्यासस्योक्तिरियम्। निरभिलाषुकाणां मुमुक्षाणामपि सज्जनेष्वेव पक्षपाताः स्नेहप्रवृत्तयो वा भवन्ति, दुर्जनेषु न।

ग) मोहं विधत्ते विषयाभिलाषः। (१/१३)

सुखभोगात्मको मनोरथो मोहमविवेकं वा करोति, विषयाभिलाषादेव धृतराष्ट्रः पाण्डवान् त्यक्तवानिति व्यासः कथयति।

घ) विश्वासयत्याशु सतां हि योगः। (१/३१)

सज्जनानां योगः शीघ्रं विश्वासं जनयति, अतो मधुरभाषणशीलेऽर्जुने यक्षः सुहृदिव विश्वस्त जात इति कविः प्रस्तौति।

ङ) मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि। (१/५३)

द्वेषस्नेहदूषितस्वभाववतां पुरुषाणां मनांसि सज्जनेष्वपि विकृतानि जायन्ते, अतो निर्जने प्रदेशे एकाकी वसन् भवान् अर्जुनः प्रमादसेवी मा स्यादिति द्रौपदी सूचयति।

च) सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे। (४/४)

अत्यन्तदुष्प्राप्ये योग्यसमागमे प्राप्ते सति प्रकर्षलक्ष्मीमुत्कर्षसम्पदं वाऽभिनन्दितुं को न स्तौति, अतोऽर्जुनोऽपि कलमधान्यस्य सौन्दर्यं विलोकयन्नधिकं प्रसन्नो बभूव।

छ) न हीङ्गितज्ञोऽवसरेऽवसीदति। (४/२०)

अभिप्रायविद् पुरुष उचितेऽवसरे मौनं नालम्बते, अतो यक्षः शरद्शोभामालोक्य तस्या वर्णनं करोतीति।

ज) न रम्यमाहार्यमपेक्षते गुणम्। (४/२३)

स्वभावसुन्दरं वस्तु गुणान्तरं नापेक्षते, अतः शरद्काले आकाशे बलाका न प्रसरन्ति, मेघमाला न दृश्यते तथाप्याकाशमुत्कृष्टां शोभां पुष्णातीति।

झ) गुणाः प्रियत्वेऽधिकृता न संस्तवः। (४/२५)

प्रीतिकरत्वविषये गुणा आवश्यका भवन्ति न च परिचयः, अतः शरदि परिचितं मयूरस्वरं विरहय्यापरिचिते हंसस्वरे प्रीतिर्जाता।

एवमेव विभिन्नेषु स्थानेषु प्रयुक्ताभिः सूक्तिभिर्महाकाव्यमिदं विराजितं विलोक्यते, यथा - 'सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्' (११/११), 'गुरुतां नयन्ति हि गुणा न संहतिः' (१२/१०), 'विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ' (२/१३ ), प्रकर्षतन्त्रा हि रणे जयश्रीः' (३/१७), 'परमं लाभमरातिभङ्गमाहुः' (१३/१२), 'प्रार्थनाधिकबले विपत्फला' (१३/६१), 'नयहीनादपरज्यते जनः' (२/४९), 'सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः' (१/५), 'हितं मनोहारि च दुर्लभं वचः'(१/४), 'सुदुर्लभाः सर्वमनोरमा गिरः' (१४/५ ), 'वसन्ति हि प्रेम्णि गुणा

न वस्तुनि' (८/३७), 'वरं विरोधोऽपि समं महात्मभिः' (१/८), 'न रम्यमाहार्यमपेक्षते गुणम्' (४/२३), 'कामाः कष्टा हि शत्रवः' (११/३५), 'गुणगृह्या वचने विपश्चितः' २-५), 'भवन्ति गोमायुसखा न दन्तिनः ' (१४/२२ ) । स्थाने स्थाने प्रयुक्ताभिः सूक्तिभिः किरातार्जुनीयमहाकाव्यस्य सौन्दर्यं वर्धितमस्ति।

**छन्दोऽलङ्कारगतं सौन्दर्यम्**

किरातार्जुनीयमहाकाव्ये विविधछन्दसां प्रयोगो विद्यते । छन्दः प्रयोगे महाकविः कुशलो वर्तते । अस्य सर्वाधिकप्रियछन्दस्तु वंशस्थ एव । महाकाव्ये वंशस्थ-वियोगिनी-द्रुतविलम्बित-प्रमिताक्षरा-प्रहर्षिणी-स्वागता-पुष्पिताग्रा-उद्गता-उपजाति-शालिनी-मत्तमयूर-मालिनी-शिखरिणी-वसन्ततिलका-औपच्छन्दसिक-उद्गता-रथाद्धता-प्रमिताक्षरा-अपरवक्त्र-प्रमुदितवदना-क्षमा-प्रभा-जलधरमाला- जलोद्धतगतिप्रभृतीनां छन्दसां प्रयोगो विद्यते। छन्दोभिः काव्ये श्रुतिमाधुर्यं विस्तार्यते। महाकाव्येऽस्मिन् प्रयुक्तैर्विविधरसानुकूलैश्छन्दोभिः काव्यं श्रवणीयं जातं विद्यते।

काव्यशोभाकरा धर्मा एवालङ्काराः । शब्दार्थमाध्यमेनालङ्काराः काव्यसौन्दर्यं वर्धयन्ति । अस्मिन् महाकाव्ये नैकविधानां शब्दार्थालङ्काराणां प्रयोगः संलक्ष्यते। यथा -

क) उपमा

अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री।
तुल्या भवद्दर्शनसम्पदेषा वृष्टेर्दिवो वीतवलाहकायाः ॥ (३/५)
अत्र व्यासस्य दर्शनसम्पद् वीतवलाहकाया दिवः वृष्टेस्तुल्य इत्युपमालङ्कारः।

ख) उत्प्रेक्षा

योगं च तं योग्यतमाय तस्मै तपः प्रभावाद् वितताार सद्यः।
येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमीलेव चिराय चक्षुः ॥ (३/२६)
अत्र योगेन तत्त्वेषु साक्षात्कारे कृतेऽर्जुनस्य दृष्टिश्चिराय समुन्मिमील इवेत्युत्प्रेक्षालङ्कारः।

ग) रूपकम्

विपाण्डुभिर्म्लानतया पयोधरैश्च्युताऽचिराऽऽभागुणहेमदामभिः।
इयं कदम्बाऽनिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते ॥ (४/२४)
अत्र कदम्बानिल एव भर्ता, अचिराऽऽभागुण एव हेमदामानि, दिश एव वध्व इति रूपकालङ्कारः।

घ) अर्थान्तरन्यासः

तथापि निघ्नं नृप ! तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः।
वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः ॥ (१/१२)
अत्र उत्तरा सामान्यकथनेन पूर्वार्धस्य विशेषकथनस्य समर्थनादर्थान्तरन्यासालङ्कारः।

ङ) काव्यलिङ्गम्

अद्य क्रियाः कामदुघाः क्रतूनां सत्याऽऽशिषः सम्प्रति भूमिदेवाः।
आ संसृतेरस्मि जगत्सु जातस्त्वय्यागते यद् बहुमानपात्रम् ॥ (१/६) अत्र पदार्थहेतुकं काव्यलिङ्गालङ्कारः।

च) स्वाभावोक्तिः

स मन्थराऽऽवल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः।
निरीक्षितुं नोपरराम बल्लवीरभिप्रनृत्ता इव वारयोषितः ॥ (४/१७)

अत्र वारयोषितां स्वाभाविकावस्थावर्णनात् स्वभावोक्त्यलङ्कारः।

अस्य महाकाव्यस्य भाषायां माधुर्यप्रौढतयोरपूर्वः समन्वयो दृश्यते। भावपक्षं न तथोपेक्षमाणोऽपि कविरसौ प्राधान्येन कलापक्षधरः। पञ्चदशसर्गे कवेः शब्दविलासो दर्शनीयः। कतिपयश्लोका एकाक्षरिणश्च सन्ति,

यथा - न नोननुन्नो नुन्नोनो नाना नानानना ननु।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत्॥ (१५/१४)

चित्रकाव्यप्रणयनस्य त्वयं प्रवर्तक एव। शब्दविलासचातुर्येऽर्थालङ्कारविन्यासे चायं सफलतमो विद्यते। अत्र प्रमुखानामलङ्कारामेव विवेचनं प्रस्तुतमस्ति। कविना महाकाव्ये संस्कृकाव्यशास्त्रिभिः प्रस्तुतानां प्रायः सकलानामप्यलङ्काराणामुपयोगो विहितः। अत्रानुप्रास-मालोपमा-यमक-विभावना-विशेषोक्ति-विरोध-श्लेष-समासोक्ति-व्यतिरेक-तुल्ययोगिता-दृष्टान्त-पर्याय-भ्रान्तिमान्-यथासङ्ख्यसदृशानामलङ्काराणां यथौचित्येन प्रयोगः संलक्ष्यते।

**रस-गुण-रीतिजन्यं सौन्दर्यम्**

किरातार्जुनीयमहाकाव्ये प्रधानरूपेण वीररसस्य प्रयोगो विद्यते। अत्र शृङ्गारादय रसा वीररसस्यैवाङ्गत्वेन प्रयुक्ताः सन्ति। आचार्यमल्लिनाथानुसारेण 'शृङ्गारादिरसोऽङ्गमत्र विजयी वीरप्रधानो रसः।' महाकाव्यस्याद्यन्तं स्वरूपमुत्साहशौर्यपराक्रमाणां परिचायकम्। वीररसस्य परिपोषणार्थमत्रान्येषां रसाणामप्युपयोगो विहितः। अर्जुनस्येन्द्रकीलप्रयाणे द्रौपदीगतस्य विप्रलम्भशृङ्गारस्य गन्धर्वोपभोगप्रसङ्गे च सम्भोगशृङ्गारस्य परिपाको विद्यते। एवमेव किरातार्जुनयोर्युद्धे रौद्रस्य भयानकस्य च प्रयोगः संलक्षते। महाकाव्यस्य तृतीयसर्गे शत्रून् पराजेतुमुत्प्रेरयन्त्या द्रौपद्या वचने वीररसस्यैवोत्कर्षो दृश्यते। चतुर्थसर्गे शरदृतोर्वर्णनक्रमे शान्तरसस्याधिक्यं वर्तते। महाकाव्ये पाञ्चालीरीति-प्रसादगुणयोः प्रयोगे विद्यमानेऽपि प्राधान्येनौजोगुणस्य गौडीरीतेश्च प्रयोगो दृश्यते। एभि रसगुणरीतीनाञ्च समुचितै प्रयोगैः महाकाव्यस्य सौन्दर्यं चामत्कारिकरूपेण सम्वर्धितमस्ति।

**महाकाव्यस्योद्देश्यम्**

नैकविधैः काव्यतत्त्वैर्महाकाव्यस्य सौन्दर्यप्रकाशनमस्योद्देश्यं संलक्ष्यते। महाभारतीयां कथामाश्रित्य विरचिते किरातार्जुनीयमहाकाव्ये समाज-धर्म-राजनीति-व्यवहार-दर्शन-नीत्यादिविषयाणां समुचितविन्यासो दृश्यते। महाकाव्ये तात्कालिकस्य समाजस्य राज्यव्यवस्थायाश्च यथार्थचित्रणं विद्यते। 'प्रकर्षतन्त्रा हि रणे जयश्रीः' इत्यादिना राजनैतिकशक्त्याश्चित्रणं विहितम्। तृतीयसर्गस्य प्रारम्भे व्यासस्यागमनसन्दर्भस्य वर्णनेन महाकाव्ये आर्षसभ्यतायाः स्फुटं चित्रणं दृश्यते। प्रतिश्लोकेऽर्थान्तरन्यासाद्यलङ्कारमाध्यमेन कविः सर्वजनहितायोपदेशवचनं प्रकटयति, यथा -

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥ (२/३०)

कर्मयोगी भारविः कर्मणि विश्वसिति, न तु भाग्ये। अत एव सकलजनान् परिश्रमाय प्रेरयति। कविरसौ ग्राम्यजीवनचित्रणे राजनैतिकघटनाक्रमवर्णने च निपुणः। राजनीतौ आवश्यकीयानां सामदामदण्डभेदादीनां चित्रणेऽसौ राजनीतिज्ञोऽमात्य एव प्रतिभाति। अत्र काव्ये भारतवर्षस्य प्राचीनस्त्रीणां गभीरसाहसयुतानानि वचनानि द्रौपदीमुखेन प्रकटयन् कविः तात्कालिक-महिलाष्वपि राजनीतेर्ज्ञानं पराक्रमभावना चासीदिति कथयति। कविना स्वान्तसुखाय सामाजिकमनविनोदाय च प्रकृतेर्मनोहरं चित्रणं प्रस्तुतम्। शब्दार्थालङ्कारैः समलङ्कृतस्यार्थगौरवेण समन्वितस्य

स्वाभाविक-प्रकृतिचित्रणभूतस्याद्वितीयकाव्यलेखनम्, पौराणिक-शुष्क-विषयवस्तून्यपि रसात्मक-कलात्मकरूपेण सर्वजनाह्लादाय प्रस्तुतीकरणमस्य महाकाव्यस्योद्देश्यं वर्तते। इदं काव्यमालक्ष्य समालोचकः मल्लिनाथः कथयति, यत्-

नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजः
तस्योत्कर्षकृते नु वर्ण्यचरितो दिव्यः किरातः पुनः।
श्रृङ्गारादिरसोऽङ्गमत्र विजयी वीरः प्रधानो रसः
शैलोद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम्॥

भारवेः महाकाव्यं नारिकेलफलतुल्यमस्ति । शब्दार्थबोधे काठिन्यं वर्तते, परमर्थबोधानन्तरं काव्यं रसान्वितमस्तीति कथयति मल्लिनाथः, यथा -

नारिकेलफलसम्मितं वचो भारवेः समदि तद्विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्॥

अस्य महाकाव्ये कल्पनायाः प्राधान्यमपि दृश्यते। श्लोकरचनायां कल्पनायाः प्रचुरप्रयोगादमुं समालोचकाः 'आतपत्रभारविः' इत्युपनाम्ना जानन्ति। उपनाम्नः कारणभूतस्य निदर्शनालङ्कारप्रयुक्तस्य श्लोको यथा -

उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतसरसिजसम्भवः परागः।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम्॥ (५/३९)

**महाकाव्यस्य मूल्याङ्कनम्**

महाकविभारवेरष्टादशसर्गात्मकस्य किरातार्जुनीयमहाकाव्यस्य कथावस्तु महाभारतस्थवनपर्वतो गृहितमस्ति। वनपर्वस्य २७-४० अध्यायसम्बद्धा क्षीणा घटनाऽस्य विशालमहाकाव्यस्य कथावस्तुरूपेणावस्थिता । अस्मिन् महाकाव्ये प्रथमसर्गतोऽष्टादशसर्गपर्यन्तं क्रमशः ४६, ५९, ६०, ३८, ५२, ४७, ३९, ५७, ७७, ६३, ८१, ५४, ७१, ६४, ५३, ६४, ६४, ४८ सङ्ख्यकाः श्लोकाः सन्ति । महाकाव्ये पूर्णश्लोकसङ्ख्या १०३७ दृश्यते । एतत् महाकाव्यं पाण्डित्यपूर्णं कलात्मकञ्च विद्यते । किरातार्जुनीयमहाकाव्यस्याध्ययनेनैवाचार्येण भामहेन महाकाव्यस्य लक्षणं निर्मितमिति समालोचकाः कथयन्ति। एतद् महाकाव्यं संस्कृतमहाकाव्यलक्षणानुसारमेव रचितमस्ति। चतुर्दशशतकेन आचार्यविश्वनाथेन सर्गबन्धो महाकाव्यं इत्यादिना महाकाव्यलक्षणमुल्लिखितम् । अत्र महाकाव्ये अर्जुनः धीरोदात्तगुणान्वितः क्षत्रीयो नायकः । किराताधिपतिः शङ्करश्च । अस्य महाकाव्यस्याङ्गीरसो वीरः, श्रृङ्गारादयश्च अङ्गानि।

किरातार्जुनीयमहाकाव्यस्य कथायाः प्रमुखमुद्देश्यं शत्रून् प्रति प्रतिशोध एव वर्तते । अत्र पात्रेषु नाटकीयसंवादस्य प्रयोगो विद्यते। महाकाव्यस्य नायकोऽर्जुनो धीरः, पराक्रमी, शिवभक्तश्चास्ति। युधिष्ठिरः क्षमायाः शान्तेश्च प्रतिमूर्तिरिव। द्रौपदी-भीमादिभिर्युद्धाय बहुधा उत्प्रेरितोऽपि दूरदर्शी अयं संयमितो दृश्यते। भीमो वीरयोद्धा वर्तते। द्रौपदी वाक्चातुर्ययुता राजनीतिनिपुणा सहृदया नारी संलक्ष्यते। एभिः प्रमुखैः पात्रैर्महाकाव्यस्य कथावस्तु साफल्यं प्राप्तम्।

कलापक्षधरस्यास्य कवेः प्रमुखवैशिष्ट्यमर्थगाम्भीर्यं वर्तते। अस्य महाकाव्यं कालिदासस्येव द्राक्षाफलतुल्यं न, अपि तु नारिकेलफलतुल्यं प्रतिभाति । कालिदासस्य महाकाव्यादुत्तरकालजनितं माघस्य महाकाव्यात् पूर्वसमयजातमस्य महाकाव्यमलौकिकवैचित्र्ययुतं मनोरमं च दृश्यते । अस्य महाकाव्ये प्रमुखरूपेण कलात्मकता, वर्णनात्मकता, अर्थगम्भीरता, तार्किकता, आलङ्कारिकता, कल्पनात्मकता, स्वच्छन्दता चेति वैशिष्ट्यानि प्राप्यन्ते।

विविधानां काव्यसौन्दर्यपरिपोषकानां तत्त्वानां प्रयोगेण हृदयाह्लादकं काव्यं विनिर्मीय पाठकमनोरञ्जनञ्च काव्यस्योद्देश्यं संलक्ष्यते। अतः काव्यसौन्दर्यदृशा काव्यमिदं सफलं प्रतीयते।

**निष्कर्षः**

किरातार्जुनीयं महाकाव्यं विविधैः काव्यसौन्दर्यैः सुललितं पठनीयञ्चास्ति । महाकविभारविना महाभारतकथामाश्रित्य कलात्मकशैल्या विरचितमष्टादशसर्गात्मकं वीररसप्रधानं किरातार्जुनीयमहाकाव्यं संस्कृतकाव्यजगति सुप्रसिद्धमस्ति। महाकाव्यमिदमर्थगाम्भीर्ययुक्तं बृहत्त्रय्यां प्रथमपरिगणितञ्च वर्तते। अत्र अर्जुनस्य किरातवेशधारिणा शङ्करेण सह युद्धं वर्णितम्। अर्जुनाय दिव्यास्त्राणां प्राप्तिरेव महाकाव्यस्य फलं वर्तते। स्पष्टता-पुनरुक्तेरभावोऽलङ्कृतशब्दयोजनाश्चास्य महाकाव्यस्य वैशिष्ट्यम् । महाकाव्येऽस्मिन् ऋतु-हिमालय-सन्ध्या-चन्द्र-प्रभातादीनां रोचकं रमणीयञ्च चित्रणं विद्यते । भारवेरर्थगौरवम् इत्युक्त्यनुसारेण किरातर्जुनीयस्यार्थगौरवमतीव प्रसिद्धमस्ति । कविभारविर्महाकाव्ये शब्दार्थालङ्काराणां प्रयोगकौशलं प्रकाशयति । एवञ्चासौ चित्रकाव्यस्य चमत्कारमपि प्रदर्शयति । महाकाव्येऽनेन काव्य-व्याकरण-नीति-काम-छन्दोऽलङ्कारादीनां प्रचलितानां विद्यानां पूर्णरूपेणानुशीलनं विहितं दृश्यते। अत्र विश्वनाथप्रतिपादितानि सकलान्यपि महाकाव्यलक्षाणानि संयोजितानि विद्यन्ते। महाकाव्यलक्षणानुसारेणात्र सर्गान्ते छन्दोपरिवर्तनमपि प्राप्यते । अत्र वंशस्थ-वियोगिनी-द्रुतविलम्बित-प्रमिताक्षरा-प्रहर्षिणी-स्वागता-पुष्पिताग्रा-उद्गता-उपजाति-शालिनी-मत्तमयूर-मालिनी-शिखरिणी-वसन्ततिलका-औपच्छन्दसिक-उद्गता-रथाद्धता-प्रमिताक्षरा-अपरवक्त्र-प्रमुदितवदना-क्षमा-प्रभा-जलधरमाला-जलोद्धतगतिप्रभृतीनां छन्दसां प्रयोगो विद्यते । एवञ्चात्र अनुप्रासोपमोत्प्रेक्षारूपकविभावनादीनां शब्दार्थालङ्काराणामौचित्यानुसारेण संयोजनं प्राप्यते । काव्ये प्रतिपादितैर्नैकविधैः सौन्दर्यतत्त्वै रसिकाः पाठका लाभान्विता जायन्ते। काव्यस्योत्कर्षप्रवर्धकानां नैकविधानां सौन्दर्यतत्त्वानां विशिष्टीकृतमध्ययनमावश्यकमस्ति । मूलतो किरातार्जुनीयं महाकाव्यं विविधकाव्यसौन्दर्यैः समन्वितं सुललितं हृदयाह्लादकञ्च संलक्ष्यते।

**सन्दर्भसामग्रीसूची**

आनन्दवर्धनः (ई.२००६), *ध्वन्यालोकः*, चौखम्बा संस्कृत सिरिज अफिस।
उपाध्यायः, बलदेवः (ई.१९९२), *संस्कृत साहित्य का इतिहास* (दशम सं.), शारदा निकेतन।
द्विवेदी, कपिलदेवः (ई.१९९२), *संस्कृतनिबन्धशतकम्,* विश्वविद्यालय प्रकाशन।
भामहः (वि.सं. २०१९), *काव्यालङ्कारः,* (सम्पा.देवेन्द्रनाथ शर्मा), विहार राष्ट्रभाषा परिषद्।
भारविः (ई.१९७१), *किरातार्जुनीयम्,* (व्याख्या-रामप्रताप त्रिपाठी), लोकभारती प्रकाशन।
मम्मटः (ई.१९९८), *काव्यप्रकाशः* (व्याख्या : आचार्य विश्वेश्वर), ज्ञानमण्डल लिमिटेड।
मिश्रः, जगदीशचन्द्र (ई.२०१०), *संस्कृतकाव्यशास्त्रेतिहासः,* चौखम्बा सुरभारती प्रकाशन।
मिश्रः, रामचन्द्र (ई.२०१०), *संस्कृतसाहित्येतिहासः*, चौखम्बाविद्याभवन।
राजवंश सहाय 'हीरा' (ई.२००२), *संस्कृत साहित्य-कोश* (च.सं.), चौखम्बा विद्याभवन।
वामनः (ई.२०१०), काव्यालङ्कारसूत्रवृत्तिः, (च.सं.), (व्या.-पं.केदारनाथ शर्मा), चौखम्बा कृष्णदास अकादमी।
विश्वनाथः (ई.१९९५), *साहित्यदर्पणः* (पञ्चम सं.), कृष्णदास अकादमी।
शुक्लः, रमेशचन्द्रः (वि.सं.२०२३), *प्रबन्धरत्नाकरः,* चौखम्बा विद्याभवन।